# तालनामानि

तालस्तुलेख्यपत्रःस्यात्तृणराजोमहोन्नतः।।

Synonyms of tala are lekhyapatra, trna raja, mahonnata.

श्रीतालनामानि

श्रीतालोमधुतालश्चलक्ष्मीतालोमृद्रुच्छदः।।

Synonyms of sritala are madhutala, lakshmitala and mrducchada.

हिन्तालनामानि

हिन्तालःस्थूलतालश्चवल्कपत्रोबृहद्दलः
Synonyms of hintala are  sthula tala, valka patra and brhaddala.

तालगुणाः

तालवृक्षस्तुमधुरःशीतलोमदकृद्गुरुः।
पुष्टिकृच्छुक्रकफकृन्मेदकृद्बलकारकः।।
वृष्यश्चसारकःपित्तदाहशोषविषश्रमान्।
विषकुष्ठकृमीरक्तदोषवातांश्चनाशयेत्।। **(Nir)**

Tala vrksha is madhura in rasa, guru, sara in guna, sita in veerya, increases kapha, madakara, pusti kara, meda bala kara, vrshya, destroys pitta, rakta and vata dosha, cures daha, sosa, visha, srama, visha, kustha and krmi.

अस्य फलगुणाः

वातहाबृंहणोबल्यः क्रिमिहाकुष्ठशनः।
रक्तपित्तहरःस्वादुस्तालः सप्तगुणान्वितः।।

Its phala is svadu in rasa, alleviates vata, brmhana, balya, cures krmi, kustha, raktapitta and is sapta gunanvita.

अस्यामफलगुणाः

आममस्यफलंप्रोक्तंस्निग्धंस्वादुगुरुस्मृतम्।
मलावरोधकंबल्यंशीतलंधातुवर्द्धकम्।
वृष्यंतृप्तिकरंमांसपित्तकरंस्मृतम्।
वातंश्वासंरक्तपित्तंव्रणंदाहंक्षतंतथा।।
पित्तक्षयंरक्तदोषनाशयेदितिकीर्तितम्।।

Its amaphala is svadu in rasa, snigdha, guru in guna, sita in veerya, malavarodhaka, balya, vrshya, trptikara, dhatuvardhaka, mamsakara, increases pitta, destroys vata, pitta and rakta dosha, cures svasa, raktapitta, vrana, daha, ksata and ksaya.

अस्यपक्वफलगुणाः

पक्वंतालफलंपित्तरक्तश्लेष्मविवर्द्धनम्।
दुर्ज्जरंबहुमूत्रंचतन्द्राभिष्यन्दशुक्रदम्।।

Its pakva phala incrreases pitta, rakta, slesma vivardhana, is durjjara, bahumutra kara and tandra abhishyanda sukrada.

अस्यार्द्रफलबीजगुणाः

आर्द्रंतुफलबीजंचमूत्रलंशीतलंस्मृतम्।
रसेपाकेचमधुरंकफकृद्वातपित्तहृत्।।

Ardra phala bija is madhura in rasa and paka, sita in veerya, mutrala, increases kapha and alleviates pitta.

अस्यफलमज्जा गुणाः

तालमज्जातुतरुणकिंचिन्मदकरीलघुः।
श्लेष्मलावातपित्तघ्नासस्नेहामधुरासरा।। **(Bpn)**

Majja is madhura in rasa, sasneha, laghu, sara in guna, taruna, kincit madakara, increases slesma, alleviates vata and pitta.

तालफलोद्भवजलगुणाः

तालाम्बुपित्तजिच्छुक्रस्तन्यवृद्धिकरंगुरु।। **(Rjv)**

Talambu is guru in guna, alleviates pitta, increases sukra and stanya.

तालमण्डिकागुणाः

श्लेष्मदोषकरीवृष्यावातलाश्लेष्मवर्द्धिनी।
कासहृल्लाविध्वंसकरणीतालमण्डिका।। **(आ.सं)**

Tala mandika is slesma dosha kara, vrshya, vatala, slesma vardhana, kasa hrllasa vidhvamsa kara.

तालजंतरुणंतोयमतीवमदकृन्मतम्।
अम्लीभूतंतदातुस्यात्पित्तकृद्वातदोषहृत्।।

Taruna tala is toya ativa, mada kara, amlibhuta, increases pitta and alleviates vata dosha.

तालपञ्जरगुणाः

तालवृक्षस्यशीर्षस्थःपंजरोधातुवर्द्धनः।
वातपित्तहरश्चैववस्तिशुद्धिकरःपरः।।

Tala vrksha is Sirshatha:, Panjaro, dhatuvardhana, Vata pitta hara, Vasti suddhikara.

तालवृन्तवायुगुणाः

तालवृन्तभवोवातस्त्रिदोषशमनोलघुः। **(Rjv)**

Talavrnta is Vata tridosha samana, Laghu.

तालमूलगुणाः
तन्मूलंतुभवेत्स्वादुपाकेचरक्तपित्तहम्।

Talamula is Svadu in Paka, Rakta pitta hara.

श्रीतालगुणाः

श्रीतालोमधुरोत्यंतमीषच्चैवकषायकः।
पित्तजित्कफकारीचवातमीषत्प्रकोपयेत।।

Sritala is madhura, slightly kashaya, in rasa, Pitta hara, Kapha kara, slightly increases vata.

हिन्तालगुणाः

हिन्तालोमधुराम्लश्चकफकृत्पित्तदाहनुत्।
श्रमतृष्णापहारीचशिशिरोवातदोषनुत्।। **(Rjn)**

Hintala is Madhura, Amla in rasa, Kapha kara, Pitta daha hara, srama trshna hara, Sita in virya , Vata dosha hara.